कुष्माण्डमज्जोर्व्वाब्धफलादृते । मांसं मूलकसंसिद्धं घृतेन मधुमांसके । मत्स्यानि चुरिकारेण क्षौद्रमुष्णेन वारिणा पुनरुष्णीकृतञ्चान्नं घृतं कांस्ये दशाह्निकम् । दध्ना तक्रेण पयसा तालस्यापि फलेन च । विरोधान्नैव भुञ्जीत मतिमान् कदलीफलम् । विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् वमनं शमनं वारि पूर्व्वं वा हितभोजनम् शाम्येताल्पतया वापि दीप्ताग्नेस्तरुणस्य च स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् । अदृष्टद्वारदोषास्तु जायन्ते पापिनामिह" आह्निकतत्त्वे वैद्यकम् ।

**अभङ्ग** पु० न०त० । १ भङ्गाभावे २ पलायनाभावे च न०ब० । "भङ्गरहिते त्रि० । ३ अभङ्गाख्ये "पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मक" इति सा०द० उक्ते श्लेषे शब्दालङ्कारभेदे पु० । यथा "पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः" । अन्धकेऽत्राभङ्गः श्लेषः ।

**अभङ्गुर** त्रि० न भङ्गुरः । भङ्गुरभिन्ने स्थिरे "अभङ्गुरतनुत्विषां बलयिता शतैर्विद्युताम्" रसगङ्गाधरः ।

**अभद्र** न० विरोधे न०त० । सुखभिन्ने दुःखे १ न०ब० । २ मङ्गलभिन्ने अमङ्गले च ३ तत्साधने ४ तदाश्रये च त्रि० ।

**अभय** न० अभावे न०त० । १भयाभावे । "प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च" मनुः । "अभयं वै जनक ! प्राप्तोऽसीति" श्रुतिः । "प्रवृत्तिं च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये" गीता ६त० । २ भयशून्ये त्रि० । न भयमस्मात् ५ब० । ३परमात्मनि, ४तज्ज्ञाने च । ५हरितक्याम् ६दुर्गामूर्त्तिभेदे च स्त्री ७ वीरणमूले उशीरे न० ८ सर्वपरिग्रहशून्ये, शास्त्रोपदिष्टेऽर्थेसन्देहेनानुष्ठातरि ९ आत्मनिष्ठे पु० । "उच्चमूलत्रिकोणेषु वर्त्तेते गुरुभार्गवौ । अभयाभिधयोगोऽयं भयङ्करविनाशन" इति "यत्नैकादशगश्चन्द्रोभानुर्वा प्रबलः शुभः । अभयोनाम योगोऽयमरिभूतविनाशकृदिति" च ज्योतिषोक्ते १० यात्रिकयोगभेदे पु० । न भयं यस्मात् ५त० । माभैषीरित्युक्त्वा ११ उत्तोलितदक्षिणहस्तप्रसारभेदे "अभयं वरदं चैव दक्षिणे दधतीक्रमात्" श्यामाध्यानम् । १२ त्राणे च न० ।

**अभयकृत्** त्रि० अभयं त्राणं करोति कृ—क्विप् ६त० । १ त्राणकर्त्तरि । न भयकृत् विरोधे न०त० । भयङ्करभिन्ने २ सौम्ये । अभयकारकादयोऽप्यत्रार्थे । [सौम्ये ।

**अभयङ्कर** त्रि० न भयङ्करः विरोधे न०त० । भयङ्करभिन्ने

**अभयङ्कृत्** स्त्री द्वि० अभयं कुरुतः क्विप् वेदे पृ० मुम् । द्यावापृथिव्योः द्यावापृथिव्याविल्युपक्रम्य "उरू गव्यूती अभयङ्कृताविति "उरू गव्यूती ते अभये स्वामित्यतदाह" शत०ब्रा० ।

**अभयजात** पु० अभयाय जातः । गर्गादिगणमध्ये मुनिभेदे तस्यापत्यं यञ् । आभयजात्यः तदपत्ये पुंस्त्री० स्त्रियां ङीप् यलोपश्च आभयजाती । पुंसि बहुषु लुक् । अभयजाताः । यूनि आभयजातायनः ।

**अभयडिण्डिम** पु० अभयाय स्वयोधभयाभावाय डिण्डिमः स्वसैन्यप्रोत्साहनार्थं वाद्यमाने रणढक्कादौ वाद्यभेदे ।

**अभयद** त्रि० अभयं भयाभावं ददाति तदर्थं वचनं प्रयुज्य रक्षति दा—क ६त० । मा भैषीरित्यादिवचनमुक्त्वा भीत- २ त्राणकर्त्तरि "तातमत्रभयदार्हति" किरा० अभयप्रदयोऽप्यत्र । "यानशय्याप्रदोभार्य्यामैश्वर्य्यमभयप्रदः २ विष्णुः ।

**अभयदक्षिणा** स्त्री अभये त्राणे त्रातेन देया दक्षिणा । त्रातेन रक्षितरि देयदक्षिणायाम् । "मधूदकं फलं मूलमेधांस्यभयदक्षिणा अभ्युद्यतानि याह्याणि" का०ख० "सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम्" मनुः । अभयं दक्षिणेव देयत्वात् । अभयरूपदेये "रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्" मत्स्य पु० । अभयदक्षिणाम-भयदानम् रघु० । [शब्दे विवरणम् ।

**अभयमुद्रा** स्त्री अभयार्था मुद्रा । १ तन्त्रोक्ते मुद्राभेदे मुद्रा-

**अभयवाच्** स्त्री अभयार्था वाक् । १ अभयदानार्थे मा भैषीरित्यादिवाक्ये ।

**अभयाद्य** पु० अभया हरितकी आद्या यस्य । १ वैद्यकोक्ते मोदकभेदे । स च "अभया पिप्पलीमूलं मरिचं नागरं तथा ॥ त्वकपत्रपिप्पलीकुस्तविडङ्गामलकानि च । कर्षः प्रत्येकमेषान्तु दन्त्याः कर्षत्रयन्तथा ॥ षट्कर्षाश्च सितायास्तु द्विपलं त्रिवृतो भवेत् । सर्वं सुचूर्णितं कृत्वा मधुना मोदकं कृतम् ॥ खादेत् प्रतिदिनञ्चैकं शीतञ्चानुपिबेज्जलम् । तावद्विरिच्यते जन्तुर्य्यावदुष्णं न सेवते ॥ अभयाद्योमोदकोऽयम्" चक्रदत्तोक्तः ।

**अभव** पु० भव उत्पत्तिः अभावे न०त० । १ भवाभावे जन्माभावे "मत्त एव भवाभवौ" गीता । २ विनाशे "भवाय सर्वभूतानामभवाय च रक्षसाम्" रामा० । ७ब० । ३मोक्षे "प्राप्तुमभवमभिवाञ्छसि वा" किरा० शिवभिन्ने पु० ।

**अभव्य** न० न भव्यम् अप्राशस्त्ये न०त० । १ अमङ्गले, २दुष्टभाग्ये च न०ब० । ३ दुर्भाग्यवति त्रि० । "उपनतमवधीरयन्त्यभव्याः" किरा० ।

**अभाग** पु० न भागः अभावे न०त० । १ भागाभावे ।